क्रमकारिकाशिक्षा

श्रीगणेशाय नमः

प्रणम्याद्यं दिनमणिं योगीश्वरशिरोमणिम्
सर्वज्ञं याज्ञवल्क्यं तच्छिष्यं कात्यायनम्मुनिम् १
सर्वं याजुषमन्त्राणां वेदे वाजसनेयके
क्रमावसानविषयां कारिकामारभामहे २
श्लोके विन्द्वादिरहितः प्रतीकेषु न दुःसहः
प्रत्येकं प्रथमा षष्ठी सप्तम्युक्तश्च कल्पते ३
पदानामानुपूर्व्येण क्रम एषः प्रवर्तते
गणान्तानां क्रमो नास्ति इति कात्यायनोऽब्रवीत् ४
न वेष्ट्याश्च द्विवेष्ट्याश्च त्रिवेष्ट्याश्च तथा परे
चतुर्व्वेष्ट्यो मध्यवेष्ट्यः पञ्चवेष्ट्य इतीरितः ५
अवग्रहोऽनुवाकान्ते अर्द्धर्चान्ते ऋचां तथा
यजुषां वाक्यावसानेष्विति साधारणो विधिः ६
प्रत्यक्षं याज्ञवल्क्यं श्रीशम्भुमिश्रविनिर्मिता
क्रियतां क्रमितैः कण्ठैः कारिका रत्नमालिका ७
ह्रस्वपूर्वो ह्यनुस्वारो दीर्घानुस्वारभाग्भवेत्
द्वेशः परश्चेन्न तथा क्रमकाले तु वाजिनाम् ८
ओम् । इषेत्वेत्ययमध्यायो ह्यनुवाकान्तवेष्टनः
गायत्रेण त्रिवेष्ट्योऽत्र पुरा क्रूरत्रिवेष्टनः ९
देव सवितस्त्रिवृदद्व्येकमेषा ते तु द्विवेष्टनः
एतन्ते द्व्येकता त्वग्नीषोमयोरनुवाकवृत् १०
अग्ने दब्धायऽएकत्वन्देवागातुविदे द्विवृत्
सम्बर्ह्यादिषट्कैकामुरुव्विष्णो द्विवेष्टनः ११
ततोऽसिद्धे त्रिचतुष्कैकं संव्वर्च्चेति द्विवेष्टनः
यज्ञसञ्चेत्येकतात्वेऽग्नये कव्येति न वेष्टनः १२
येरू द्विवृन्नमो द्वैकमाद्यन्तोर्ज्जरूपोर्द्विवृत्

समिधाद्यष्टसु द्विवृदग्निर्ज्योतिः षडेकता १३
इन्द्रः पञ्चादिवेष्ट्यः स्यात्समिदं पञ्चवेष्टनः
उपप्रषट्स्वपि द्विवृत्तनूपात् सप्तकैकता १४
उपत्त्वा पञ्चसु द्विवृदिडऽएह्यन्तवेष्टनः
सोमानाद्यष्टसु द्विवृत्परिते दूडभस्त्रिवृत् १५
भूर्भुवः स्वोनुवाकैक्यं प्रघासीति द्विवेष्टनः
यदग्रामेत्यन्तवेष्ट्यः स्यान्मो षूणेति द्वयोर्द्विवृत् १६
अवभृथेत्यन्तवेष्ट्यः पूर्णादर्व्यष्टसु द्विवृत्
एष तैका त्र्यम्बकयोर्द्वयोर्द्विवृत्परोऽन्तवृत् १७
वाजिनीत्वाजो द्विवेष्ट्यो वाज्यहम्पञ्चकैकता
एदमादित्रिषु द्विवृन्महीनां युगलैकता १८
आपो द्विवेष्टनः स्वाहा यज्ञमित्यन्तवेष्टनः
आकूत्त्यै प्रयुजे त्रिवृद्विश्वो देवस्य तु द्विवृत् १९
ऋक्सामयोश्चतुष्कैक्यं व्रतं कृणु सप्तैकता
त्वमग्नेव्रतपाद्द्विवृद्रास्स्वे पञ्चान्तवेष्टनः २०
एषा ते पञ्चकैकत्वं वस्व्यादिश्चतुरैकता
एष ते युगलैकत्वमभित्यन्त द्विवेष्टनः २१
प्रजाभ्यस्त्वाऽन्तवृच्चन्द्रम्प्रथमार्द्धान्तवेष्टनः
सग्मेऽर्द्धशुक्रन्तपसन्तन्वादिचतुरेकता २२
प्रतिपन्थान्द्विवेष्ट्यः स्याददित्यास्त्वक् द्विवेष्टनः
वनेषु युगयोर्द्विवृदु स्त्रावेतं युगैकता २३
नमो मित्रस्य तु द्विवृद्वरुणस्य त्रिवृत्परः
अग्नेस्तनूर्युगैकत्वं भवतन्नो द्वयोर्द्विवृत् २४
आपतयेत्त्वेन्द्रघोषस्त्वाऽनुवाकान्तवेष्टनः
युञ्जतेति त्रिषु द्विवृद्देवश्रुतयुगैकता २५
विष्णवादित्रिषु द्विवृद्विष्णोरराटमन्तवृत्

आददे पञ्चकैकत्वं यवोऽसि चतुरैकता २६
परि त्वा गिर्वणो द्विवृदिन्द्रस्य स्यू रथान्तवृत्
विभूरस्यानुवाकैक्यं ज्योतिर्वैष्टचतुष्कवान् २७
अग्ने नय द्वयोर्दिवृद्देव सवितस्त्रयैकता
अत्यन्यान्त्रितयैकत्वमयं हि त्वा द्विवेष्टनः २८
अग्रेणीरन्तवृद्या ते त्रिषु द्विवृत्परोऽन्तवृत्
उपावीरश्च मनस्ते यत्ते त्वेत्यनुवाकवृत् २९
समुद्रादिचतुष्कैक्यमिदमापो द्वयोर्द्विवृत्
अग्नेर्वस्त्वन्तवेष्ट्यः स्यादमूर्य्यास्तु द्विवेष्टनः ३०
हृदे त्त्वा युगलैकत्वा शृणोत्वग्निर्द्विवेष्टनः
देवीरापस्त्रयैकत्वं यमग्ने पृत्स्विति द्विवृत् ३१
आददे सप्तकैकत्वं त्वमङ्गेति त्रिवेष्टनः
वाचस्त्रैक्यं चोपयाम द्वयैक्यमाचार्या च द्विवृत् ३२
इन्द्रवायूऽअयं वां च राया यावां त्रिवेष्टनः
तम्प्रत्नाद्यर्द्धयोर्द्विवृत्त्वन्तशुक्रैषतेऽन्तवृत् ३३
अच्छिनस्य चतुर्षु द्विवृदयं वेनस्त्वमध्यमः
एष तेऽत्यन्तवेष्ट्यः स्थाद्ये देवासो द्विवेष्टनः ३४
आग्नेयत्रैक्यमिन्द्रायद्वैक्यं मूर्द्धा द्विवेष्टनः
उपांशोरन्तवेष्ट्यः स्यादपो देवा द्विवेष्टनः ३५
वृष्णाऽऊर्मिस्त्रयैकत्वं सविता त्वनुवाकवृत्
सोमस्य त्विषिर्य्यमैक्यं सधमादी द्विवेष्टनः ३६
क्षत्रस्योल्बं त्र्यैक्यं अवेष्टाश्चतुष्कान्तवेष्टनः
ऊर्द्धामारोह चद्यर्द्धवर्जं विद्याद्द्विवेष्टनः ३७
द्विवृत्सोमस्य त्विषिर्हिरण्यरूपौ त्रिवेष्टनः
सोमस्य त्वाऽन्तवेष्ट्यः प्रपर्वतस्य त्रिवेष्टनः ३८
प्रजापतयेति द्विवेष्ट्यो रुद्र यत्वन्तवेष्टनः

इन्द्रस्य त्वान्तवृन्माते द्विवृदग्नयऽअन्तवृत् ३९
हंसो द्विवृच्चे यदसि स्योनासि चान्तवेष्टनः
निषसाद द्विवेष्ट्योऽभिभूरादिचतुरैकता ४०
सवित्रा द्वैष्ट्यमश्विभ्यां युग्मं युग्मं त्रिवृद् द्विवृत्
युञ्जानः सप्तसु द्विवृदाददे युगलैकता ४१
हस्तादि चतुर्षु द्विवृत्प्रतूर्वं युगलैकता
अन्वाग्न्येकादशा नद्विवृत्पृथिव्याः सधस्थास्त्रिवृत् ४२
अपा पृष्टन्द्वयोर्द्विवृत्सँव्वसाथाँ त्रिवेष्टनः
त्वामग्ने पञ्चदशसु द्विवृत्त्रिवृद्दूषाग्नि ते ४३
ओषध्येकादशानाद्विवृन्मखस्य शिरोन्ततः
कृत्वाय सा द्विवेष्ट्यः स्याद्वसवस्त्वाऽन्तवेष्टनः ४४
अदितिष्ट्वा युगैकत्वम्मित्रस्य युगलन्द्विवृत्
उत्थाय बृहतीति द्वावाकूतिन्त्वन्तवेष्टनः ४५
मा स्वादिषु च सर्वेषु द्विवृदन्नपते त्रिवृत्
द्विवृद्दूशानोऽध्यायद्विसुपर्णोऽसि नवैकता ४६
चिदसीत्यन्तवृद्यन्ते सञ्ज्ञानञ्च त्रिवेष्टनम्
द्विवृन्मयि ह्यनुवाको ध्रुवासि चतुरैकता ४७
काण्डादिति चतुर्षु द्विवृद्विराड्ज्योतिस्त्रयैकता
अषाढाद्यास्तथैकोनविंशति स्युर्द्विवेष्टनः ४८
इमम्मा स्यात्त्रिवृदेकशफं पशुमिति द्विवृत्
सहस्त्रमूर्णायुमजो ह्यन्तवर्ज्जं द्विवेष्टनः ४९
त्वं यविष्ठ द्विवेष्ट्यः स्यादपान्त्वेत्यन्तवेष्टनः
नवायं पुरो न वेष्ट्यो ह्यन्त्याम्यर्धं विना द्विवृत् ५०
ध्रुवक्षितिश्चतुर्ष्षु द्विवृददित्त्यास्त्वा त्रिवेष्टनः
सजूर्म्मूर्द्धा वचश्चेति ह्यनुवाकान्तवेष्टनः ५१
इन्द्राग्नी स्याद्विवृद्विश्वकर्मा त्वा युगलैकता

आद्य मूर्धाऽशुरग्नेभार्गैकयेत्यनुवाकवृत् ५२
अग्ने जातां द्विवृन्त्रिवत्सहसाऽग्नेः पुरीषन्द्विवृत्
एवादिरश्मिना राज्ञी चायम्पुरश्चानुवाकवृत् ५३
अग्निर्मूर्द्धाऽनुवाको द्विवेष्ट्योऽत्रान्तत्रिवेष्टनः
येनऽऋषयोऽनुवाको द्विवृत्पञ्चान्तवेष्टनः ५४
प्रोधद्विवृत्त्वन्तवर्जमाणे हि द्विपरोऽन्तवृत्
नमस्ते चानुवाकेषु सप्तस्वाद्यो द्विवेष्टनः ५५
अनुवाकान्तवृत्षट्सु द्रापेअन्धाष्टसु द्विवृत्
दशास्मिन्महतीत्याद्याः सर्वे चैवान्तवेष्टनाः ५६
अस्मन्नूर्ज्जमिदन्द्विवृदिमामेति त्रयैकता
समुद्रसप्तसुद्विवृन्नमस्ते हरसे विवृत् ५७
ये देवादिषु च द्विवृदाजुहानोऽन्तवेष्टनः
तां सवितुः पञ्चसु द्विवृत् शुक्रज्योत्यनुवाकवृत् ५८
द्विवृदिमंस्तानुवाकऽएताऽअर्षतिं तत्त्रिवृत्
वाजादयोऽनुवाकाः स्युरनुवाकान्तवेष्टनाः ५९
द्विवृद्वाजस्यानुवाकः पयः पृथिव्यान्तु विवृत्
ऋताष्टकैक्य रुचन्नोद्वयोर्द्विवृत्परीतान्तवृत् ६०
विषु ह्यऽग्निं युनज्म्यादिष्वनुवाकेषु च द्विवृत्
स्वाद्योन्त्रित्परीतीद्विर्व्वायोस्त्रि द्विः पुनाति ते ६१
त्रिब्रह्मक्षत्रन्नाना द्विगघर्द्धान्त वृदाश्विनम्
मोदार्द्धयुक्तन्तेजोऽन्त वृघाव्याघ्रादिषु द्विवृत् ६२
षड्विंशतिषु मन्त्रेषु स्यात्पितृभ्यः स्वधान्तवृत्
अक्षन्द्वादशसु द्विवृदिमर्ठः हविरिति त्रिवृत् ६३
उदीरतादिषु द्विवृत् क्रमस्यैव तु वेष्टनम्
त्वयाचिवेष्टयः प्रथमाद्वैक्यं लोमानि च द्विवृत् ६४
शूद्द्रोर्ववर्ज्येय्यद्देवाध्यायः सर्वाधवेष्टनः

स च शूद्रेर्य्यमन्त्रः स्यादम्ययम्पितृपदे द्विवृत् ६५
इमम्मेत्र्यादिषु द्विवृद्धोता यक्षत्सु चान्तवृत्
त्रिवृत्पूर्वाश्विनौ छागाद्यन्तवृत्तदनन्तरम् ६६
त्रिवृत्पराश्विनौ छागो वनस्पत्यग्निचान्तवृत्
देवम्बर्ह्यादिषु द्विवृद्देवो ह्यत्यन्तवेष्टनः ६७
अग्निमद्य च सूपस्था त्वामद्येति त्रयैकता
तेजोन्तवृदिमाद्विवृदभिधा युगलैकता ६८
नद्विवृद्यो अर्वाग्नयेऽन्तवृद्धिङ्कारानुवाकवृत्
हिरण्यपाण्यादिना वाजीजनश्च द्विवेष्टनः ६९
कायादयोऽनुवाकस्यानुवाका ह्यन्तवेष्टनः
हिरण्यगर्भेत्यध्याये प्रजापतयऽअन्तवृत् ७०
यः प्राणतो द्विवृच्चन्द्रमास्तदत्यन्तवेष्टनः
युजन्तीतित्रिषु द्विवृद्वसवो युगलैकता ७१
स्विच्चतुर्षु वायुष्वा पञ्चसु स्याद्द्विवेष्टनः
अग्निः पशुर्म्मध्यवर्ज्जन् द्विवृदत्राम्यैकता ७२
उत्सक्थ्यादानुवाकेषु पञ्चसु स्याद्द्विवेष्टनः
अश्वस्त्वारम्य चत्वारः सोमाद्यध्यांतमेकता ७३
रोहिताद्द्विसमायुक्तः शितिरन्धोऽन्तवेष्टनः
शुद्धवालश्च प्रभृत्यवदित्याद्धान्तिमेकता ७४
वृद्धयुक्तफलग्वामि द्वैक्यं शिल्पास्तथान्तवृत्
सप्तमूर्द्धानुवाकेषु मन्त्राणामन्तवेष्टनम् ७५
शादं चैवानुवाकानान्नवकं चानुवाकवृत्
पञ्चमूर्द्धानुवाकेषु विवृदिमानुक द्विवृत् ७६
अग्निश्चेति त्रिवृद्द्विवृदन्तरेषु त्रिषु त्रिवृत्
वैश्वानरं चैव विद्यादग्निरुक्थेन चान्तवृत् ७७
वैश्वानरस्य मुमतावादयः षड्द्विवेष्टनः

द्विवृत्समास्त्वेत्यऽध्यायश्चापश्चिदन्त्यवेष्टनः ७८
सँव्वत्सरोऽसि द्विवृदत्यन्वाकोऽनुवाकवृत्
होतायक्षदेकादशपूर्वश्चैवा परो द्विवृत् ७९
देवबर्हिरपरो द्विवृच्छुचमुष्णिहमात्रिका
ऊर्ध्वातोऽर्द्धगणान्तेषु तत्तन्मन्त्राः शतान्तवृत् ८०
द्विवेष्टमिन्द्राय वयोधसऽइत्यन्तयोर्द्वयोः
समिद्धोऽञ्जन्नध्याये मन्त्राः सर्वे द्विवेष्टनाः ८१
अन्त्यानामनुवाकानां त्रयाणामनुवाकवृत्
द्विवृदस्याजराध्यायौ बृहन् निदिति चान्तवृत् ८२
द्विवृद्यज्ञाग्रतोऽध्यायोद्युभिरक्तुभिरन्तवृत्
विश्वानि च विभक्तारं द्विवृदन्ये तु वेष्टनाः ८३
सहस्रशीर्षा मन्त्रेषु चतुर्विंशतिषु द्विवृत्
न तस्य त्रिवृदेषो इयेनद्यौर्दशसु द्विवृत् ८४
त्रिवृद्युभिरहोभिस्तु द्विवृद्वायुः पुनाति च
सवितात्रिवृदन्येद्विवृत्स्योना पृथिवी द्विवृत् ८५
ऋचँव्वाचन्त्रिवृद्यन्मेऽन्तार्द्धवर्ज्ज द्विवेष्टनः
ऊतिभिः सहितः कया त्वमादिचतुर्षु द्विवृत् ८६
अहानिशन्त्रिवृद्देवीरभिष्टयऽइति द्विवृत्
द्यौः शान्तिरन्तवेष्ट्यः स्याद्दृते दृठ०ह त्रिवेष्टनः ८७
ज्योक्तेऽन्तवृन्नमस्तेऽस्तुयतस्तच्चक्षुश्च द्विवृत्
आददे देवि देव्यश्चेतीन्द्रैक्यं प्रैत्विति द्विवृत् ८८
मखस्याश्वस्य नवैक्यं यमाय त्रितयैकता
द्विवृद्गर्भोऽनुवाकस्तु विश्वासान्त्यं विना त्रिवृत् ८९
आददे चतुष्कैकं यस्ते द्विवृत्परोऽन्तवृत्
समुद्राय तदद्वित्र्यैक्यं यमायेति द्विवेष्टनः ९०
विश्वाऽआशाः पञ्चकैक्यं स्वाहा पूष्णोऽनुवाकवृत्

अभिमन्तु द्विवृद्याते चतुष्कैक्यमृचि द्विवृत् ९१
यावतीत्यनुवाकैक्यन्त्विषः सँव्वृगथान्तव्वत्
स्वाहाप्राणानुवाकानामष्टानामनुवाकवत् ९२
आयामाय युगैकत्वं यमायेत्यन्तवेष्टनः ९३
ईशावास्यमिदं सर्व्वं द्विवेष्ट्यं सर्वसम्मतम् ९४
इति क्रमकारिका शिक्षा समाप्ता

Reference:
“Kramakārikā Śikṣā,” in Ācāryaśrīrāmaprasādatripāṭhī, ed., *Śikṣāsaṁgrahaḥ,* Varanasi: Sampurnanand Sanskrit University Press, 1989, pp. 308-316.